.. ananta padmanabha vrata puujaa. .

॥ अनन्त पद्मनाभ व्रत पूजा॥

प्रामादि नाम संवत्सरे दक्षिणायणे वर्षा ऋतौ भाद्रपद मासे
शुक्ल पक्षे चतुर्दश्याम् तिथौ शतभिषा नक्षत्रे शुक्र वासरे

1 At the regular Altar

ॐ सर्वेभ्यो गुरुभ्यो नमः ।
ॐ सर्वेभ्यो देवेभ्यो नमः ।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
प्रारंभ कार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्ट देवता कुलदेवता सुप्रसन्नो वरदो भवतु ॥
अनुज्ञां देहि ॥

At Shrii anantapadmanAbha Altar

२ आचमनः

ॐ केशवाय स्वाहा । ॐ नारायणाय स्वाहा ।
ॐ माधवाय स्वाहा ।
ॐ गोविंदाय नमः । ॐ विष्णवे नमः ।
ॐ मधुसूदनाय नमः । ॐ त्रिविक्रमाय नमः ।
ॐ वामनाय नमः । ॐ श्रीधराय नमः ।
ॐ हृषीकेशाय नमः । ॐ पद्मनाभाय नमः ।
ॐ दामोदराय नमः । ॐ संकर्षणाय नमः ।
ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः ।
ॐ अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः ।
ॐ अधोक्षजाय नमः । ॐ नारसिंहाय नमः ।
ॐ अच्युताय नमः । ॐ जनार्दनाय नमः ।
ॐ उपेंद्राय नमः । ॐ हरये नमः ।
श्री कृष्णाय नमः ॥

---

३ प्राणायामः

ॐ प्रणवस्य परब्रह्म ऋषिः । परमात्मा देवता ।
दैवी गायत्री छन्दः । प्राणायामे विनियोगः ॥

ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः ।
ॐ जनः । ॐ तपः । ॐ सत्यं ।
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही
धियो योनः प्रचोदयात् ॥
(Repeat Achamana)
ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

---

४ संकल्पः

ॐ श्रीमान् महागणाधिपतये नमः ।

श्री गुरुभ्यो नमः । श्री सरस्वत्यै नमः ।
श्री वेदाय नमः । श्री वेदपुरुषाय नमः ।
इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः ।
स्थान देवताभ्यो नमः । ग्रामदेवताभ्यो नमः ।
वास्तुदेवताभ्यो नमः । शचीपुरंदराभ्यां नमः ।
उमामहेश्वराभ्यां नमः । मातापितृभ्यां नमः ।
लक्ष्मीनारायणाभ्यां नमः ।

सर्वेभ्यो देवेभ्यो नमो नमः ।
सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ।
येतद्कर्मप्रधान देवताभ्यो नमो नमः ॥

॥ अविघ्नमस्तु ॥

सुमुखश्च एकदंतश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो बालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटेश्चैव विघ्नः तस्य न जायते ॥

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

सर्वमंगल मांगल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्रयंबके देवी नारायणी नमोऽस्तुते ॥

सर्वदा सर्व कार्येषु नास्ति तेषां अमंगलं ।
येषां हृदिस्थो भगवान् मंगलायतनो हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ।
विद्या बलं दैवबलं तदेव लक्ष्मीपतेः तेंघ्रिऽयुगं स्मरामि ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दिवर श्यामो हृदयस्थो जनार्दनः ॥

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् ।

सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ॥

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य
अद्य ब्रह्मणोऽद्वितीय परार्धे विष्णुपदे श्री श्वेतवराह कल्पे
वैवस्वत मन्वंतरे भारत वर्षे भरत खंडे जंबूद्वीपे
दण्डकारण्य देशे गोदावर्या दक्षिणे तीरे कृष्णवेण्यो उत्तरे
तीरे परशुराम क्षेत्रे (संयुक्त अमेरिका देशे West Lafayatte
ग्रामे or Australia देशे Victoria ग्रामे बह्वीनु देशे)
शालिवाहन शके वर्तमाने व्यवहारिके
प्रामादि नाम संवत्सरे दक्षिणायणे वर्षा ऋतौ भाद्रपद मासे
शुक्ल पक्षे चतुर्दश्याम् तिथौ शतभिषा नक्षत्रे शुक्र वासरे
सर्व ग्रहेषु यथा राशि स्थान स्थितेषु सत्सु
येवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ
मम आत्मन श्रुतिस्मृति पुराणोक्त फलप्राप्यर्थं मम
सकुटुम्बस्य क्षेम स्थैर्य आयुरारोग्य चतुर्विध पुरुषार्थ
सिध्यर्थं अंगीकृत श्री अनन्तपद्मनाभ व्रतांगत्वेन
संपादित सामग्रय्या गणेश वरुण ब्रह्मा सूर्यादि नवग्रह
इंद्रादि अष्टलोकपाल गणपति चतुष्ट देवता पूजन पूर्वकं
श्री अनन्तपद्मनाभ प्रीत्यर्थं यथा शक्तया यथा
मिलितोपचार द्रव्यैः पुरुषसूक्त श्रीसूक्त पुराणोक्त
मंत्रैश्च ध्यानावाहनादि षोडशोपचारे यमुना पूजनं,
शेष पूजनं, श्री अनन्तपद्मनाभ पूजनं च तथा
व्रतोक्त कथा श्रवणं च करिष्ये ॥

इदं फलं मयादेव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनि जन्मनि ॥
(keep fruits in front of the Lord)

---

५ षडङ्ग न्यास
(touching various parts of the body)

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥
अंगुष्ठाभ्यायां नमः । (touch the thumbs)
हृदयाय नमः ॥

ॐ ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥
तर्जनीभ्यां नमः । (touch both fore fingers)
शिरसे स्वाहा ॥

ॐ चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥
मध्यमाभ्यां नमः । (touch middle fingers)
शिखायै वौषट् ॥

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांगुं अकल्पयन् ॥
अनामिकाभ्यां नमः । (touch ring fingers)
कवचाय हुम् ॥

धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्त्रः ।
तमेवं विद्यानमृत इह भवति नान्यः पन्था अयनाय विद्यते ॥
कनिष्ठिकाभ्यायं नमः । (touch little fingers)
नेत्रत्रयाय वौषट् ॥

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥
करतलपृष्ठाभ्यायां नमः । अस्त्राय फट् ॥
(snap fingers circle head clockwise and clap hands)

---

६ दिग्बन्धन
(show mudras)

ॐ अनन्तपद्मनाभ इति दिग्बन्धः । दिशो बद्नामि ॥

---

७ गणपति पूजा

आदौ निर्विघ्नतासिध्यर्थं महा गणपतिं पूजनं करिष्ये ।
ॐ गणानां त्व शौनको घृत्समदो गणपतिर्जगति
गणपत्यावाहने विनियोगः ॥
(pour water)

ॐ गणानां त्वा गणपतिं आवामहे ।
कविं कविनामुपम श्रवस्तमं ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत ।
आनः शृण्वन्नूतिभिः सीदसादनं ॥

भूः गणपतिं आवाहयामि ।
भुवः गणपतिं आवाहयामि ।
स्वः गणपतिं आवाहयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः ।
ध्यायामि । ध्यानं समर्पयामि ।

ॐ महा गणपतये नमः । आवाहनं समर्पयामि ॥
ॐ महा गणपतये नमः । आसनं समर्पयामि ॥
ॐ महा गणपतये नमः । पाद्यं समर्पयामि ॥
ॐ महा गणपतये नमः । अर्घ्यं समर्पयामि ॥
ॐ महा गणपतये नमः । आचमनीयं समर्पयामि ॥
ॐ महा गणपतये नमः । स्नानं समर्पयामि ॥
ॐ महा गणपतये नमः । वस्त्रं समर्पयामि ॥
ॐ महा गणपतये नमः । यज्ञोपवीतं समर्पयामि ॥

ॐ महा गणपतये नमः । चंदनं समर्पयामि ॥
ॐ महा गणपतये नमः । परिमल द्रव्यं समर्पयामि ॥
ॐ महा गणपतये नमः । पुष्पाणि समर्पयामि ॥
ॐ महा गणपतये नमः । धूपं समर्पयामि ॥
ॐ महा गणपतये नमः । दीपं समर्पयामि ॥
ॐ महा गणपतये नमः । नैवेद्यं समर्पयामि ॥
ॐ महा गणपतये नमः । ताम्बूलं समर्पयामि ॥
ॐ महा गणपतये नमः । फलं समर्पयामि ॥
ॐ महा गणपतये नमः । दक्षिणां समर्पयामि ॥
ॐ महा गणपतये नमः । आर्थिक्यं समर्पयामि ॥

ॐ भूर्भुवस्वः महा गणपतये नमः ।
मन्त्रपुष्पं समर्पयामि ॥
ॐ भूर्भुवस्वः महा गणपतये नमः ।
प्रदक्षिणा नमस्कारान् समर्पयामि ॥
ॐ भूर्भुवस्वः महा गणपतये नमः ।
छत्रं समर्पयामि ॥

ॐ महा गणपतये नमः । चामरं समर्पयामि ॥
ॐ महा गणपतये नमः । गीतं समर्पयामि ॥
ॐ महा गणपतये नमः । नृत्यं समर्पयामि ॥
ॐ महा गणपतये नमः । वाद्यं समर्पयामि ॥
ॐ महा गणपतये नमः । सर्व राजोपचारान् समर्पयामि ॥

॥ अथ प्रार्थना ॥
ॐ वक्रतुण्ड महाकाय कोटि सूर्य समप्रभ ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥
ॐ भूर्भुवस्वः महा गणपतये नमः । प्रार्थनां समर्पयामि ॥

अनया पूजया विघ्न हर्ता महा गणपति प्रीयताम् ॥

---

८ दीप स्थापना

अथ देवस्य वाम भागे दीप स्थापनं करिष्ये ।
अग्नि नाग्नि समिध्यते कविर्ग्रहपतिर्युवा हव्यवात् जुवास्यः ॥
(light the lamps)

---

९ भूमि प्रार्थना

महिद्यौ पृथ्वीचन इमं यज्ञं मिमिक्षतां पिप्रतान्नो भरीमभिः ॥

---

१० धान्य राशि

ॐ औषधाय संवदंते सोमेन सहराज्ञ ।
यस्मै कृणेति ब्राह्मणस्थं राजन् पारयामसि ॥
(Touch the grains/rice/wheat)

---

११ कलश स्थापना

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते
उक्थैर्यज्ञेषु वर्धते ॥
(keep kalasha on top of rice pile)
ॐ इमं मे गङ्गे यमुने सरस्वती शुतुद्रिस्तोमं सचता परुष्ण्य ।
असिक्न्य मरुद्वृधे वितस्थयार्जीकीये श्रुणुह्या सुषोमय ॥
(fill kalasha with water)
ॐ गंधद्वारां धूरदर्शां नित्य पुष्पं करिषिणीं ।
ईश्वरिं सर्व भूतानां तामि होपह्वयेश्रियं ॥
(sprinkle in/apply ga.ndha to kalasha)
ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि ।
बृहस्पति प्रसोतास्थानो मंचत्वं हसः ॥
(put beetle nut in kalasha)
ॐ सहिरत्नानि दाशुषुसुवाति सविता भगः ।
तम्भागं चित्रमीमहे ॥
(put jewels / washed coin in kalasha)
ॐ हिरण्यरूपः हिरण्य सन्द्रिग्पान्न पात्स्येदु हिरण्य वर्णः ।
हिरण्ययात् परियोनेर्निषद्या हिरण्यदा ददत्थ्यन् नमस्मै ॥
(put gold / daxina in kalasha)
ॐ कान्डात् कान्डात् परोहंति परुषः परुषः परि एवानो दूर्वे
प्रतनु सहस्रेण शतेन च ॥
(put duurva / karika)
ॐ अश्वत्थेवो निशदनं पर्णिवो वसतिश्कृत ।
गो भाज इत्किला सथयत्स नवथ पूरुषं ॥
(put five leaves in kalasha)
ॐ युवासुवासः परीवीतागात् स उश्रेयान् भवति जायमानः ।
तं धीरासः कावयः उन्नयंति स्वाद्ध्यो स्वाद्ध्यो मनसा देवयंतः॥
(tie cloth for kalasha)
ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापठ ।
वस्नेव विक्रीणावः इषमूर्जं शतकृतो ॥
(copper plate and ashhTadala with kuMkuM)

इति कलशं प्रतिष्ठापयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

११.१ यमुना पूजन
On the second kalasha)

११.१ यमुना ध्यानं

क्षीरोदार्णव संभूते इन्द्रनील समप्रभे ।
सुप्रसन्ने महादेवि विष्णुमूर्ते नमोस्तुते ॥

श्री यमुना देवतायै नमः। ध्यानम् समर्पयामि॥

११.२ यमुना आवाहनं

यमुने ते नमस्तुभ्यं सर्व कामप्रदायिनि ।
सर्व सौभाग्यदे देवि यमुने ते नमोस्तुते ॥

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

श्री यमुना देवतायै नमः। आवाहनं समर्पयामि॥

११.३ यमुना आसनं

वेदपादे नमस्तुभ्यं सर्वलोक हितेरते ।
सर्व शाप प्रशमने तुङ्गभद्रे नमोस्तुते ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

श्री यमुना देवतायै नमः। आसनं समर्पयामि ॥

११.४ यमुना पाद्यं

गरुड पादे नमस्तुभ्यं सर्वाभरण सम्युते ।
सर्व तीर्थ महादेवि भद्रायै ते नमोस्तुते ॥

अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥

श्री यमुना देवतायै नमः। पादोयो पाद्यं समर्पयामि ॥

११.५ यमुना अर्घ्यं

कृष्णवेण्यै नमस्तुभ्यंह कृष्ण वर्णे सुलोचने ।
कृष्णमूर्ते नमस्तुभ्यं देवि कृष्णे नमोस्तुते ॥

कांसोस्मि तां हिरण्यप्राकारा मार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां त्वामिहोपह्वये श्रियम् ॥

श्री यमुना देवतायै नमः । अर्घ्यं समर्पयामि ॥

११.६ यमुना आचमनं

सत्कर्म निरते देवी ज्ञान मूर्त्ति प्रकाशिनि ।
आत्मज्योति महामूर्त्ति सर्वनुष्ठान कारिणि ॥

चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

श्री यमुना देवतायै नमः। आचमनीयं समर्पयामि ॥

११.७ यमुना मधुपर्कं

सर्वागम नमस्कार्ये प्रधानोचित देवते ।
इदम् ग्रहाण देवेशि मधुपर्कं ददामिते ॥

श्री यमुना देवतायै नमः। मधुपर्कं समर्पयामि ॥

११.८ यमुना पंचामृत स्नानं

नन्दि पादे नमस्तुभ्यं शङ्करार्ध शरीरिणि ।
सर्वलोकनुते देवि भीम रत्यै नमोस्तुते ॥

श्री यमुना देवतायै नमः। पंचामृत स्नानं समर्पयामि॥
श्री यमुना देवतायै नमः। गन्धोदक स्नानं समर्पयामि॥
श्री यमुना देवतायै नमः। शुद्धोदक स्नानं समर्पयामि॥

ॐ आपोहिष्टा मयो भुवः । तान ऊर्जे दधातन ।
महेरणाय चक्षसे । योवः शिवतमोरसः तस्यभाजयते हनः ।
उशतीरिव मातरः । तस्मा अरंगमामवो । यस्य क्षयाय जिंवध ।
आपो जन यथाचनः ।

११.९ यमुना वस्त्रं

सिंहपादे नमस्तुभ्यं नारसिम्ह्यै नमोस्तुते ।
सर्वलक्षण संयुक्ते यमुने ते नमोस्तुते ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मिराष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ॥

श्री यमुना देवतायै नमः। वस्त्रं समर्पयामि॥

११.१० यमुना कञ्चुकीं

कृष्ण पादाब्ज सम्भूते गंगे त्रिपथगामिनि ।
जटा जूट समङ्गते भागीरथ्यै नमोस्तुते ॥

श्री यमुना देवतायै नमः। कञ्चुकीं समर्पयामि॥

११.११ यमुना आभरणं

गोदावरि नमस्तुभ्यं सर्वाभीष्ट प्रदायिनि ।

सर्वालङ्कार संयुक्ते गोदावर्यै नमोस्तुते ॥

श्री यमुना देवतायै नमः। सर्वाभरणानि समर्पयामि॥

११.१२ यमुना उपवीतं

काञ्चनं ब्रह्मसूत्रं च ब्रह्मणा निर्मितं पुरा ।
अहम् दास्यामि देवेशि यमुने ते नमोस्तुते ॥

श्री यमुना देवतायै नमः। उपवीतं समर्पयामि॥

११.१३ यमुना चन्दनं

चन्दनागरु कस्तूरि रोचनम् कुङ्कुमं तथा ।
कर्पूरेण समायुक्तं गन्धं ददामि च भक्तितः ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां त्वामिहोपह्वये श्रियम् ॥

श्री यमुना देवतायै नमः। गन्धं समर्पयामि॥

११.१४ यमुना अक्षतान्

श्वेतांश्च चन्द्र वर्णाभान् हरिद्र रागरञ्जितान् ।
अक्षतान्श्च सुरश्रेष्ठे ददामि यमुनेश्वरी ॥

श्री यमुना देवतायै नमः। अलङ्कारार्ते अक्षतान् समर्पयामि॥

११.१५ यमुना कुङ्कुमं

कुङ्कुमं कामदं दिव्यं स्त्रीणां बालस्य भूषणम् ।
सौभाग्यार्थे प्रयच्छामि देवित्वं प्रतिग्रह्यताम् ॥

श्री यमुना देवतायै नमः। कुङ्कुमं समर्पयामि॥

११.१६ यमुना पुष्पं

मन्दार पारिजातादौ केतकी पतलादिभिः ।
मल्लिका पुष्प सम्घातेर् अर्चये त्व शुभप्रदे ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥

श्री यमुना देवतायै नमः। पुश्पाणि समर्पयामि॥

११.१७ अथाङ्ग पूजा

चञ्चलायै नमः । पादौ पूजयामि॥
चपलायै नमः । जानुनी पूजयामि॥
कमलवासिन्यै नमः । जंघे पूजयामि॥
मन्मथवासिन्यै नमः । ऊरून् पूजयामि॥
कमलनेत्रे नमः । कटिं पूजयामि॥

दुष्टहन्त्र्यै नमः । नाभिं पूजयामि
ललितायै नमः । भुजौ पूजयामि॥
रक्तवर्णायै नमः । कण्ठं पूजयामि॥
गङ्गायै नमः । मुखं पूजयामि॥
कृष्णवेण्यै नमः । ललाटं पूजयामि॥

गौर्यै नमः । नेत्रे पूजयामि॥
भागीरत्यै नमः । शिरः पूजयामि॥
यमुनायै नमः । सर्वाङ्गानि पूजयामि॥

११.१८ यमुना पत्रपूजा

यमुनायै नमः । जाजी पत्रं समर्पयामि॥
गङ्गायै नमः। शत पत्रं समर्पयामि॥
लोकवन्दितायै नमः। चूत पत्रं स्मर्पयामि॥
लोकपावनायै नमः। शामी पत्रं समर्पयामि॥
कमलवासिन्यै नमः। दत्तूर पत्रं समर्पयामि॥

महामायायै नमः। पारिजात पत्रं समर्पयामि॥
गोदावर्यै नमः। वेणु पत्रं समर्पयामि॥
उत्कण्टिन्यै नमः। मरुग पत्रं समर्पयामि॥
भवहन्त्र्यै नमः । देवदारु पत्रं समर्पयामि॥
अघनासिन्यै नमः । अपामार्ग पत्रं समर्पयामि॥

कान्त्यै नमः । धाती पत्रं समर्पयामि॥
विन्ध्यवासिन्यै नमः । अगस्त्य पत्रं समर्पयामि॥
भागीरत्यै नमः । तुलसी पत्रं समर्पयामि॥
सुरासुरपूजितायै नमः । समस्त पत्राणि समर्पयामि॥

११.१९ अथः पुश्प पूजा

भागीरत्यै नमः । कमल पुष्पं समर्पयामि॥
विन्ध्यवासिन्यै नमः । नीलोत्पल पुष्पं समर्पयामि॥
कौमार्यै नमः । नन्दावर्त पुष्पं समर्पयामि॥
काळ्यै नमः । मन्दार पुष्पं समर्पयामि॥
कान्त्यै नमः । सुरन्गि पुष्पं समर्पयामि॥

अरहनाशिन्यै नमः । पारिजात पुष्पं समर्पयामि॥
भवहन्त्र्यै नमः । सुगन्धि पुष्पं समर्पयामि॥

गौर्यै नमः । केतकी पुष्पं समर्पयामि॥
उत्कण्टिन्यै नमः । जाजी पुष्पं समर्पयामि॥
महामायायै नमः । शत पुष्पं समर्पयामि॥

तेजसे नमः । मल्लिका पुष्पं समर्पयामि॥
मन्मथवासिन्यै नमः । चम्पका पुष्पं समर्पयामि॥
लोकपावनायै नमः । अशोक पुष्पं समर्पयामि॥
लोकवन्दितायै नमः । अगस्त्य पुष्पं समर्पयामि॥
गङ्गायै नमः । पूग पुष्पं समर्पयामि॥

यमुनायै नमः । समस्त पुश्पाणि समर्पयामि॥

११.२० अथः नामपूजा

सर्व पाप हरे देवी सर्वोपद्रव नाशिनि ।
सर्वव्रितसखे देवि यमुने ते नमोस्तुते ॥

शीताकर्शिण्यै नमः ॥
शुभ्रवर्णायै नमः ॥
कनकायै नमः ॥
कण्ठोत्पलायै नमः ॥
त्रिगुणात्मिकायै नमः ॥

ब्रह्मरूपायै नमः ॥
महारूपायै नमः ॥
गौर्यै नमः ॥
अभीष्टदात्र्यै नमः ॥
धात्र्यै नमः ॥

हरिप्रियायै नमः ॥
सिन्धुचूदायै नमः ॥
शिवायै नमः ॥
शङ्कराधशरीरिण्यै नमः ॥
सरस्वत्यै नमः ॥

गायत्रियै नमः ॥
गोदावर्यै नमः ॥
गोमत्यै नमः ॥
गरुडायै नमः ॥
गिरिजायै नमः ॥

चन्द्रचूडायै नमः ॥
कावेर्यै नमः ॥
गङ्गायै नमः ॥
तुङ्गायै नमः ॥
नर्मदायै नमः ॥

कृष्णवेण्यै नमः ॥
भीमरत्यै नमः ॥
श्री यमुनायै नमः ॥

११.२१ यमुना धूपः

दशाङ्गम् गुग्गुलम् धूपं चन्दनागरु संयुतम् ।
येतेशेव्योत्तमं धूपं यमुने ते नमोस्तुते ॥

कर्दमेन प्रजाभूतामयि सम्भवकर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥

श्री यमुना देवतायै नमः। धूपं समर्पयामि ॥

११.२२ यमुना दीपं

घृतवर्तिं समायुक्तं भवान्यै च निवेदितम् ।
ग्रहाण मङ्गलं दीपं सर्वेश्वर्य प्रदायिनि ॥

आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे ।
निचदेवीं मातरं श्रियं वासय मे कुले ॥

श्री यमुना देवतायै नमः। दीपं समर्पयामि ॥

११.२३ यमुना नैवेद्यं

कदळी नारिकेळेस्च चणकादि समन्वितम् ।
ग्रहाण मङ्गलं दीपं सर्वेश्वर्य प्रदायिनि ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥

श्री यमुना देवतायै नमः। नैवेद्यं समर्पयामि ॥

प्राणाय स्वाहा
अपानाय स्वाहा
व्यानाय स्वाहा
उदानाय स्वाहा
समानाय स्वाहा

श्री यमुना देवतायै नमः। उत्तरापोशनं समर्पयामि ॥

११.२४ यमुना पानीयं

पानीयं पावनं श्रेश्टं गन्गादि सलिलोद्भवम् ।

मुखं प्रक्षालनं देवि ग्रहाणत्वां नमोस्तुते ॥

श्री गङ्गायै नमः । मुखप्रक्षालनं समर्पयामि ॥

११.२५ यमुना करोद्वर्तनकं

कर्पूरेण समायुक्तं नागवल्लिदलैर्युतम् ।
चूर्ण कर्पूर संयुक्तं ताम्बूल् प्रतिगृह्यताम् ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

श्री गङ्गायै नमः । करोद्वर्थनार्ते चन्दनं समर्पयामि ॥

११.२६ यमुना ताम्बूलं

पूगिफलम् समायुक्तं नागवल्लि दलैर्युतम् ।
चूर्णकर्पूर संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

श्री यमुना देवतायै नमः । ताम्बूलं समर्पयामि ॥

११.२७ यमुना फल समर्पणं

इदम् फलम् मया देवि स्तापितं पुरतः स्तव ।
तेन मे सफलावाप्तिर् भवेत् जन्मनि जन्मनि ॥

श्री यमुना देवतायै नमः । फलम् समर्पयामि ॥

११.२८ यमुना दक्षिणा

हिरण्य गर्भ गर्भस्थं हेमबीज विभावसोः
अनन्तपुण्य फलदं अतः शान्तिं प्रयस्च मे

श्री यमुना देवतायै नमः । दक्षिणां समर्पयामि ॥

११.२९ यमुना नीराजनं

मङ्गलं च महादेवि मङ्गलं च शुभप्रदे ।
मङ्गलं सर्व पापघ्ने मङ्गलं मङ्गलप्रदं ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योश्वान् विन्देयं पुरुषानहम् ॥

श्री यमुना देवतायै नमः । नीराजनं समर्पयामि ॥

११.३० यमुना पुष्पांजलि

सरसिजनिलये सरोजहस्ते धवलतरां शुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीद मह्यम् ॥

श्री यमुना देवतायै नमः । पुश्पांजलिं समर्पयामि ॥

११.३१ यमुना प्रदक्षिणा

प्रदक्षिण त्रयं देवि प्रयत्नेन मयाक्रतं ।
अनन्त सागरात् पूर्वं सर्व सौभाग्यदायिनि ॥

श्री यमुना देवतायै नमः । प्रदक्षिणां समर्पयामि ॥

११.३२ यमुना नमस्कारः

करिश्यामि व्रितं देवि त्वद् भक्त्यात् त्वत् प्रसादतः ।
विग्नानि प्रशमं याव्रितादयन्तु त्वदाग्नया ॥

श्री यमुना देवतायै नमः । नमस्करान् समर्पयामि ॥

यस्य स्मृत्या च नाम्नोक्त्या तपः पूज क्रियादिशु ।
न्यूनं संपूर्णता याति सद्यो वन्दे तमच्युतं ॥

मन्त्रहीनं क्रियहीनं भक्तिहीनं जनार्दन ।
यत्क्रतन्तु मयादेवि परिपूर्णम् तदस्तुमे ।

अनेन यमुनापुजनेन यमुनान्तर्गत ।
श्रीमद् अनन्तः प्रीयताम् प्रीतो भवतु ॥

११.२ अथः शेष पूजनं

अथः शेष ध्यानं ब्रह्मान्दाधार भूतम् च यमुनान्तर वसिनं ।
फणा सप्त समायुक्तम् ध्याये नन्तं हरिप्रियम् ॥

श्री शेषाय नमः ध्यायामि ॥

११.२.१ शेष आवाहनं

शेषम् सप्त फणायुक्तम् काल पन्नग नायकम् ।
अनन्त शयनार्तं त्वां भक्त्या ह्यावा हयांयहम् ॥

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद् दशाङ्गुलम् ॥

११.२.२ शेष आसनं

नवनाग कुलाधीश शेशोधारक काश्यप ।
नानारत्न समायुक्तं आसनं प्रतिगृह्यतां ॥

पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेना तिरोहति ॥

श्री शेषाय नमः । आसनं समर्पयामि ॥

११.२/३ शेष पाद्यं

अनन्त प्रिय शेशेष जगदाधार विग्रह ।
पाद्यम् ग्रहाण भक्तया त्वम् काद्रवेय नमोस्तुते ॥

एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

श्री शेषाय नमः । पाद्यं समर्पयामि ॥

११.२/४ शेष अर्घ्यं

कश्यपानन्द जनक मुनिवन्दित भो प्रभो ।
अर्घ्यं ग्रहाण सर्वग्न सागरं शकरप्रिये ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥

श्री शेषाय नमः । अर्घ्यं समर्पयामि ॥

११.२/५ शेष आचमनं

सहस्र फणिरूपेण वसुधोधारक प्रभो ।
ग्रहाणाचमनं देव पावनं च सुशीतलं ॥

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमि मथो पुरः ॥

श्री शेषाय नमः । आचमनं समर्पयामि ॥

११.२/६ शेष मधुपर्कं

कुमाररूपिणे तुभ्यं दधिमध्वज्य सम्युतं ।
मधुपर्कं प्रदास्यामि सर्पराज नमोस्तुते ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥

श्री शेषाय नमः । मधुपर्कं समर्पयामि ॥

११.२/७ शेष पंचामृत स्नानं
(chant purusha sukta shlokas in the pages below)

श्री शेषाय नमः । पयः स्नानं समर्पयामि ॥
श्री शेषाय नमः । दधि स्नानं समर्पयामि ॥
श्री शेषाय नमः । घृत स्नानं समर्पयामि ॥
श्री शेषाय नमः । मधु स्नानं समर्पयामि ॥
श्री शेषाय नमः । शर्करा स्नानं समर्पयामि ॥
श्री शेषाय नमः । पंचामृत स्नानं समर्पयामि ॥

११.२/८ शेष स्नानं

गङ्गादि पुण्य तीर्ते त्वाम् अभ्शिन्चेय मादरात् ।
बलबद्रावतारेश नन्दनः स्रिपतेः सखिन् ॥

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन् पुरुषं पशुम् ।

श्री शेषाय नमः । शुद्धोदक स्नानम् समर्पयामि ॥

११.२/९ शेष वस्त्रं

कौशेय युग्मम् देवेश प्रीत्य तव मयार्पितम् ।
पन्नगाधिश नागेश ताक्ष्र्यशत्रो नमोस्तुते ॥

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥

श्री शेषाय नमः । वस्त्रं समर्पयामि ॥

११.२.१० शेष यज्ञोपवीतं

सुवर्ण निर्मितं सूत्रं ग्रन्थितं कण्टहारकम् ।
अनेकरत्नये खचितं सर्पराज नमोस्तुते ॥

तस्माद् यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँगसि जज्ञिरे तस्मात् यजुस्तस्माद् अजायत ॥

श्री शेषाय नमः । यज्ञोपवीतं समर्पयामि ॥

११.२.११ शेष आभरणं

अनेक रत्नान्वित हेमकुन्डले माणिक्य सम्काशित कन्कणद्वयम् ।

हैमान्गुलीयं कृत रत्न मुद्रिकं हैमं किरीटं फणिराजितेर्पितं ॥

श्री शेषाय नमः । सर्वाभरणानि समर्पयामि ॥

११.२.१२ शेष गन्धं

श्रीकन्डं चन्दनं दिव्यं गन्धाढ्यम् सुमनोहरं ।
विलेपनं सुरश्रेश्ट चन्दनं प्रतिगृह्यताम् ॥

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूगँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये ॥

श्री शेषाय नमः । गन्धं समर्पयामि ॥

११.२.१३ शेष अक्षताः

अक्षतास्च सुरश्रेश्ट कुङ्कुमाक्तः सुशोभिताः ।
मया निवेदिता भक्तया ग्रहाण परमेश्वर ॥

श्री शेषाय नमः । अक्षतान् समर्पयामि ॥

११.२.१४ शेष पुष्पमाला

कर्वीरिय जाजि कुसुमैस्चम्पकै बकुले शुबै ।
शतपत्रयेय्च कल्हारै अर्चयेत् परमेश्वर ॥

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥

श्री शेषाय नमः । पुष्पाणि समर्पयामि ॥

११.२.१५ अथः शेष अङ्ग पूजा

सहस्रपादाय नमः । पादौ पूजयामि ॥
गूडगुल्फाय नमः । गुल्फौ पूजयामि ॥
हेमजङ्घाय नमः । जंघे पूजयामि ॥
मन्द गतये नमः । जानुनि पूजयामि ॥
पीताम्बरधराय नमः । कटीं पूजयामि ॥

गम्भीरनाभाय नमः । नाभिं पूजयामि ॥
पवनाशाय नमः । उदरं पूजयामि ॥
उरगाय नमः । हस्तौ पूजयामि ॥
कालीयाय नमः । भुजौ पूजयामि ॥
कम्बुकण्टाय नमः । कण्टं पूजयामि ॥

विशवक्त्राय नमः । वक्त्रं पूजयामि ॥
फणाभूषणाय नमः । ललातं पूजयामि ॥
लक्ष्मणाय नमः । शिरः पूजयामि ॥
अनन्त प्रियाय नमः । सर्वाङ्गानि पूजयामि ॥

११.२.१६ शेष धूपं

वनस्पति रसोद्भूतो गन्दाढ्यो गन्ध उत्तमः ।
आघ्रेय सर्व देवानाम् धूपोयम् प्रतिगृयताम् ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥

श्री शेषाय नमः । धूपं समर्पयामि ॥

११.२.१७ शेष दीपं

साज्यं चवर्ति संयुक्तं वह्निना योजितम् मया ।
दीपं गृहाण देवेश त्रैलोक्य तिमिरापह ॥

भक्तया दीपं प्रयश्चामि देवाय परमात्मने ।
त्राहि मां नरकात् घोरात् दीपं ज्योतिर् नमोस्तुते ॥

ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

श्री शेषाय नमः । दीपं समर्पयामि ॥

११.२.१८ शेष नैवेद्यं

नैवेद्यं गृह्यतां देव भक्ति मे अचलां कुरुः ।
ईप्सितं मे वरं देहि इहत्र च परां गतिम् ॥

शर्कराख्हन्डख्हाद्यानि दधिक्षीरगृतानि च ।
आहारं भक्ष्य भोज्यं च नैवेद्यं प्रतिगृह्यताम् ॥

चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥

श्री शेषाय नमः । नैवेद्यं समर्पयामि ॥

नैवेद्यात् पूर्वे आचमनीयं समर्पयामि ॥

प्राणाय स्वाहा
अपानाय स्वाहा
व्यानाय स्वाहा
उदानाय स्वाहा

समानाय स्वाहा

मध्ये पानीयं समर्पयामि ।
उत्तरापोशनं समर्पयामि ॥

श्री शेषाय नमः । हस्त प्रक्षाळनं समर्पयामि ॥
श्री शेषाय नमः । मुखप्रक्षाळनं समर्पयामि ॥
श्री शेषाय नमः करोद्वर्तनार्थे चंदनं समर्पयामि ॥

पूगीफलं महद्दिव्यं नागवल्यादलैर्युतम् ।
कर्पूरेळा समायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

११.२.१९ शेष दक्षिणां

हिरण्य गर्भ गर्भस्थं हेमबीज विभावसोः ।
अनंत पुण्य फलदं अथः शांतिं प्रयश्चामि ॥

ॐ श्री शेषाय नमः । सुवर्ण पुष्प दक्षिणां समर्पयामि ॥

११.२.२० महा फलं
(put tulsi / axathA on a big fruit)

इदं फलं मयादेव स्थापितं पुरतस्थव ।
तेन मय् सफलावाप्तिर्भवेत् जन्मनि जन्मनि ॥

ॐ श्री शेषाय नमः । महाफलं समर्पयामि ॥

११.२.२१ महा नीराजन

श्रीयै जातः श्रिय आनिर्याय श्रियं वयो जनित्रभ्यो ददातु
श्रियं वसाना अमृतत्त्व मायन् भवंति सत्या समिधा विदत्यून्
श्रिय येवैनं तत् श्रिया मादधाति संततमृचा वषट्कृत्यं
संतत्तं संधीयते प्रजया पशुभिः य येवं वेद ॥

कर्पूर दीपं करुणावतारं संसार सारं भुजगेन्द्रहारम् ।
सदावसन्तं हृदयारविन्दे भवं भवानी सहितं नमामि ॥

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥

ॐ श्री शेषाय नमः । महानीराजन दीपं समर्पयामि ॥

११.२.२२ पुश्पांजलीं

नानाकुसुम संयुक्तं पुश्पान्जलिमिमं प्रभो ।
कश्यपानन्द जनक सर्पेश प्रतिगृह्यताम् ॥

श्री शेषाय नमः । पुश्पांजलिं समर्पयामि ॥

११.२.२३ प्रदक्षिणः नमस्कारः

यानि कानि च पापानि जन्मांतर कृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

नमोस्त्वनंताय सहस्र मूर्तये सहस्र पादाक्षि शिरोरु बाहवे ।
सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे नमः ॥

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन् पुरुषं पशुम् ।

श्री शेषाय नमः । प्रदक्षिणः नमस्कारान् समर्पयामि ॥

११.२.२४ प्रार्तना

अनन्तकल्पोक्तफलं देहिमे त्वं महेश्वर ।
त्वत्पूजारहितच्छार्धं फलं प्राप्नोति मानवः ॥

श्री शेषाय नमः । प्रार्थनां समर्पयामि ॥

अनेन कृत पूजनेन श्री शेषः प्रियताम् ॥

श्रीमद् अनन्त पूजा
(keep a few red threads each with 14 knots smeared with kumkum on the altar)

---

१२ कलश पूजन
(continue with second kalasha)

कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः ॥
कुक्षौतु सागराः सर्वे सप्त द्वीपा वसुंधराः ।
ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः ॥
अंगैश्च सहिताः सर्वे कलशंतु समाश्रिताः ।
अत्र गायत्री सावित्री शांति पुष्टिकरी तथा ॥

आयान्तु देव पूजार्थं अभिषेकार्थ सिद्धये ॥

ॐ सितासिते सरिते यत्र संगथे तत्राप्लुतासो दिवमुत्पतंति ।
ये वैतन्वं विसृजन्ति धीरास्ते जनासो अमृतत्त्वं भजन्ति ॥

॥ कलशः प्रार्थनाः ॥

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलं ।
योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥
सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः ।
अथः हरिप्रियोसि त्वं पूर्णकुंभं नमोऽस्तुते ॥

कलशदेवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

॥ मुद्रा ॥
(Show mudras as you chant)

निर्वीषि करणार्थे तार्क्ष मुद्रा ।
अमृति करणार्थे धेनु मुद्रा ।
पवित्री करणार्थे शंख मुद्रा ।
संरक्षणार्थे चक्र मुद्रा ।
विपुलमाया करणार्थे मेरु मुद्रा ।

---

१३ शंख पूजन
(pour water from kalasha to sha.nkha add ga.ndha flower)

शंखं चंद्रार्क दैवतं मध्ये वरुण देवतां ।
पृष्ठे प्रजापतिं विंद्याद् अग्रे गंगा सरस्वतीं ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्व देवैश्च पांचजन्यं नमोऽस्तुते ॥

पांचजन्याय विद्महे । पावमानाय धीमहि ।
तन्नो शंखः प्रचोदयात् ॥

शंख देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

१४ घंटार्चना
(Pour drops of water from sha.nkha on top of the bell apply ga.ndha flower)

आगमार्थन्तु देवानां गमनार्थन्तु राक्षसां ।
कुरु घंटारवं तत्र देवतावाहन लांछनं ॥
ज्ञानथोऽज्ञानतोवापि कांस्य घंटान् नवादयेत् ।
राक्षसानां पिशाचनां तद्देशे वसतिर्भवेत् ।
तस्मात् सर्व प्रयत्नेन घंटानादं प्रकारयेत् ।

घंट देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

(Ring the gha.nTA)

---

१५ आत्मशुद्धि
(Sprinkle water from sha.nkha on puujA items and devotees)

अपवित्रो पवित्रो वा सर्व अवस्थांगतोपि वा ।
यः स्मरेत् पुंडरीकाक्षं सः बाह्याभ्यंतरः शुचिः ॥

---

१६ नवग्रह अष्ट एवं चतुर्दल देवता पूजन

॥ नवग्रह देवता पूजन ॥
(begin at east go clockwise)

आकृष्णेनाङ्गीरसो हिरण्यस्तुपः सविता त्रिष्टुप्
सूर्यावाहने विनियोगः ॥
हिरण्ययेन सवितारतैन् देवो याति भुवनानि पश्यन् ॥
सूर्याय नमः । सूर्यं आवाहयामि ॥

आप्यायस्वेति गौतमः सोमो गायत्रि चंद्रावाहने विनियोगः ॥
ॐ आप्यायस्वसमेतुते विश्वतः सोमवृष्णम्
भवा वाजस्य संघदे । चंद्राय नमः । चन्द्रं आवाहयामि ॥

अग्नि मूर्द्ध विरूपाङ्गारको गायत्रि अङ्गारकावाहने विनियोगः ॥
ॐ अग्निमूर्धादिवः ककुत्पतिः पृथिव्या अयम् ।
आपाम्रेताम्सि जिंवति ।अङ्गारकाय नमः ।अङ्गारकं आवाहयामि ॥

उद्बुद्दद्वं सौम्यो बुधः त्रिष्टुप् बुधावाहने विनियोगः ॥
ॐ उद्बुद्यद्वं समनसः सखायाः समग्नि विंद्वं बहवः
सनीलः दधिक्रामग्नि मशसञ्च देवीमिंद्रावतो वसनिह्वयेवः ।
बुधाय नमः । बुधं आवाहयामि ॥

बृहस्पते घृत्समधो बृहस्पति त्रिष्टुप् बृहस्पत्यावाहने विनियोगः ॥
ॐ बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेष ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥
बृहस्पतये नमः । बृहस्पतिं आवाहयामि ॥

शुक्रांते भारद्वाजः शुक्रः त्रिष्टुप् शुक्रावाहने विनियोगः ॥
ॐ शुक्रांते अन्यद्य जतन्ते अन्यद्विशुरुषे अहनि दौरिवासि
विश्वहिमाया अवसि स्वाध्वो भद्रते पूशन्निहिरातिरस्तु
शुक्राय नमः । शुक्रं आवाहयामि ॥

शमग्निरिरिंबिरः शनैश्चर उष्णिक् शन्यावाहने विनियोगः ॥
ॐ शमग्निराग्निभिः करश्वन्न तपतु सूर्यः
शमवातो वात्वरपा अपसृधः

शनैश्चराय नमः । शनैश्चरं आवाहयामि ॥

कयानो वामदेवो राहुर्गायत्रि राहु आवाहने विनियोगः ॥
ॐ कयानश्चित्र आभूवदूती सदावृधः सखा ।
कया शचिष्टयाऽवृता ॥
राहवे नमः । राहुं आवाहयामि ॥

केतुं कृण्वन् मधुश्चंदः केतुर्गायत्रि केत्वावाहने विनियोगः ॥
ॐ केतुं कृण्वन् केतवे पेशो मर्य आपेशसे । समुषद्भिरजायथा ॥
केतवे नमः । केतुं आवाहयामि ॥

॥ अष्टदल देवता पूजन ॥

ॐ इंद्राय नमः । अग्नये नमः । यमाय नमः ।
नैऋतये नमः । वरुणाय नमः । वायवे नमः ।
कुबेराय नमः । ईशानाय नमः ।

॥ चतुर्दल देवता ॥

ॐ गणपतये नमः । ॐ दुर्गायै नमः ।
ॐ क्षेत्रपालाय नमः । ॐ वसोष्पतये नमः ।

रव्यादि नवग्रह अष्टदल चतुर्दलेषु
स्थित सर्वदेवताभ्यो नमः ॥

ध्यायामि । ध्यानं समर्पयामि ॥
आवाहनं समर्पयामि । आसनं समर्पयामि ॥
पाद्यं समर्पयामि । अर्घ्यं समर्पयामि ॥
आचमनीयं समर्पयामि । स्नानं समर्पयामि ॥
वस्त्रं समर्पयामि । यज्ञोपवीतं समर्पयामि ॥
गंधं समर्पयामि । धूपं आघ्रापयामि ॥
दीपं दर्शयामि । नैवेद्यं निवेदयामि ॥
मन्त्रपुष्पं समर्पयामि । सकल पूजार्थे अक्षतान् समर्पयामि ॥

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिषु ।
न्यूनं संपूर्णतां यादि सद्यो वन्दे तमच्युतम् ॥
(achyuta is that Lord who is blemishless.
When we think of Him or utter His name,
any blemishes in our tapa (penance), puja (worship)
or kriya (actions), will be removed and
our actions become pure)
अनया पूजया नवग्रहादि देवता प्रियताम् ॥

---

१७ षट् पात्र पूजा
(put tulasi leaves or axatAs in empty vessels)

वायव्ये अर्घ्यं ।
नैऋत्ये पाद्यं ।
ईशान्ये आचमनीयं ।
आग्नेये मधुपर्कं ।
पूर्वे स्नानियं ।
पश्चिमे पुनराचमनं ।

---

१८ पंचामृत पूजा
(put tulasi leaves or axatAs in vessels)

क्षीरे गोविन्दाय नमः । (keep milk in the centre)
दधिनि वामनाय नमः । (curd facing east)
घृते विष्णवे नमः । (Ghee to the south)
मधुनि मधुसूधनाय नमः । (Honey to west)
शर्करायां अच्युथाय नमः । (Sugar to north)

---

१९ मन्डप द्वार पूजा

पूर्वद्वारे द्वारश्रियै नमः ।
जयाय नमः । विजयाय नमः ।
दक्षिणद्वारे द्वारश्रियै नमः ।
नंदाय नमः । सुनंदाय नमः ॥
पश्चिमद्वारे द्वारश्रियै नमः ।
बलाय नमः । प्रबलाय नमः ॥
उत्तरद्वारे द्वारश्रियै नमः ।
कुमुदाय नमः । कुमुदाक्षाय नमः ॥

मध्ये नव रत्नखचित दिव्य सिंहासनस्योपरि
श्री अनन्तपद्मनाभ स्वामिने नमः ॥
द्वारपालक पूजां समर्पयामि ॥

---

२० पीठ पूजा

पीठस्य अधोभागे आधार शक्तयै नमः ॥ कूर्माय नमः ॥
दक्षिणे क्षीरोदधिये नमः । सिंहाय नमः ॥
सिंहासनस्य आग्नेय कोणे वराहाय नमः ॥
नैऋत्य कोणे ज्ञानाय नमः ॥
वायव्य कोणे वैराग्याय नमः ॥
ईशान्य कोणे ऐश्वर्याय नमः ॥
पूर्व दिशे धर्माय नमः ॥
दक्षिण दिशे ज्ञानाय नमः ॥
पश्चिम दिशे वैराग्याय नमः ॥
उत्तर दिशे अनैश्चराय नमः ॥
पीठ मद्धये मूलाय नमः ॥
नालाय नमः ॥
पत्रेभ्यो नमः ॥

केसरेभ्यो नमः ॥
कर्णिकायै नमः ॥
कर्णिका मध्ये सं सत्त्वाय नमः ॥
रं रजसे नमः ॥ तं तमसे नमः ॥

सूर्यमण्डलाय नमः ॥
सूर्यमण्डलाधिपतये ब्रह्मणे नमः ॥
सोममण्डलाय नमः ॥
सोममण्डलाधिपतये विष्णवे नमः ॥
वह्निमण्डलाय नमः ॥
वह्निमण्डलाधिपतये ईश्वराय नमः ॥

श्री अनन्तपद्मनाभाय नमः । पीठ पूजां समर्पयामि ॥

---

२१ दिग्पालक पूजा
(Start from east of kalasha or deity)

इंद्राय नमः ॥
अग्नये नमः ॥
यमाय नमः ॥
नैऋतये नमः ॥

वरुणाय नमः ॥
वायव्ये नमः ॥
कुबेराय नमः ॥
ईशानाय नमः ॥

इति दिग्पालक पूजां समर्पयामि ॥

---

२२ प्राण प्रतिष्ठा
(hold flowers/axata in hand)
ध्यायेत् सत्यम् गुणातीतं गुणत्रय समन्वितं
लोकनाथं त्रिलोकेशं कौस्तुभाभरणं हरिम् ।
नीलवर्णं पीतवासं श्रीवत्स पदभुषितं
गोकुलानन्दं ब्रह्माध्यैरपि पूजितम् ॥

(hold flowers/axatA in hand)
ॐ अस्य श्री प्राण प्रतिष्ठापना महा मंत्रस्य
ब्रह्मा विष्णु महेश्वरा ऋषयः
ऋग्यजुर्सामाथर्वाणि छन्दांसि प्राण शक्तिः
परा देवता आं बीजं ह्रीं शक्तिः क्रऊँ कीलकं
अस्यां मूर्तौ स्रिमद् अनन्त प्राण प्रतिष्ठा सिद्ध्यर्थे जपे विनियोगः ॥

॥ करन्यासः ॥

आं अंगुष्ठाभ्यां नमः ॥
ह्रीं तर्जनीभ्यां नमः ॥
क्रौं मध्यमाभ्यां नमः ॥
आं अनामिकाभ्यां नमः ॥
ह्रीं कनिष्ठिकाभ्यां नमः ॥
क्रौं करतलकरपृष्ठाभ्यां नमः ॥

॥ अङ्गन्यासः ॥

आं हृदयाय नमः ॥
ह्रीं शिरसे स्वाह् ॥
क्रौं शिखायै वौषट् ॥
आं कवचाय हुं ॥
ह्रीं नेत्रत्रयायवौशट् ॥
क्रौं अस्त्राय फट् ॥

भूर्भुवस्वरोम् ॥

आं ह्रीं क्रौं क्रौं ह्रीं आं
य र ल व श ष स ह
ॐ अहं सः सोहं सोहं अहं सः ।

अस्यां मूर्ते प्राणा तिष्ठंतुः
अस्यां मूर्ते जीवा तिष्ठन्तु
अस्यां मूर्ते सर्वेन्द्रियाणि मनस्त्वत् चक्षुः
श्रोत्र जिह्व घ्राणैः वाङ्काणि पादपायोपस्थानि
प्राण अपान व्यान उदान समान अत्रागत्य
सुखेन स्थिरं तिष्ठन्तु स्वाहा।

असुनीते पुनरस्मासु चक्षुवः पुनः प्राणमिहीनो
देहिभोगं जोक्षश्येम सूर्यमुच्चरन्तु मनुमते
मृडयान स्वस्ति अमृतं वै प्राणा अमृतमापः प्राणानेव
यथा स्थानं उपह्वयेत् ॥

स्वामिन् सर्व जगन्नाथ यावत्पूजावसानकम् ।
तावत्व प्रीतिभावेन बिम्बेस्मिन् कलशेस्मिन् ॥
प्रतिमायां सन्निधिं कुरु ॥

---

२३ ध्यानं

ॐ ॐ (repeat 15 times)
ॐ शांताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृअशं मेघवर्णं शुभांगम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृध्यानगंयं
वंदेविष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

(you can add more related shlokas)

२४ आवाहनं
(hold flowers in hand)

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥

आगच्छानन्त देवेश तेजोराशे जगत्पते ।
क्रियमाणां मया पूजां ग्रहाण सुरसत्तमे ॥

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

श्री लक्ष्मी सहित श्री अनन्तपद्मनाभ
सांगाय सपरिवाराय सायुधाय
सशक्तिकाय नमः ।

श्री लक्ष्मी सहित श्री अनन्तपद्मनाभं सांगं
सपरिवारं सायुधं सशक्तिकं आवाहयामि ॥
(offer flowers to Lord)

आवाहितो भव । स्थापितो भव । सन्निहितो भव ।
सन्निरुद्धो भव । अवकुंठितो भव । सुप्रीतो भव ।
सुप्रसन्नो भव । सुमुखो भव । वरदो भव ।
प्रसीद प्रसीद ॥
(show mudras to Lord)

---

२५ आसनं

पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥

अनन्ताय नमस्तेस्तु सहस्र शिरसे नमः ।
नमोस्तु पद्मनाभाय नागाधिपतये नमः ॥

ॐ श्री अनन्तपद्मनाभाय नमः । आसनं समर्पयामि ॥
(offer flowers/axathAs)

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

---

२६ पाद्यं
(offer water)

एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

अनन्त देवदेवेश पुराण पुरुशोत्थम ।
पाद्यम् गृहाण भगवन् गन्धपुश्पाक्षतैर्युतं ।

ॐ श्री अनन्तपद्मनाभाय नमः । पादोयो पाद्यं समर्पयामि ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥
पादोयो पाद्यं समर्पयामि ॥

---

२७ अर्घ्यं
(offer water)

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥

अनन्त देवदेवेश अनन्त फलदायक ।
अनन्त मूर्ते विश्वात्मान् ग्रहाणर्घ्यं नमोस्तुते ॥

ॐ श्री अनन्तपद्मनाभाय नमः । अर्घ्यं समर्पयामि ॥

कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां त्वामिहोपह्वये श्रियम् ॥
अर्घ्यं समर्पयामि ॥

---

२८ आचमनीयं
(offer water or axathA/ leave/flower)

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चादभूमितथो पुरः ॥

कर्पूर वासितं तोयं मन्दाकिन्यः समाहृतम् ।
आचम्यतां जगन्नाथ मयादत्तं हि भक्तिथः ॥

ॐ श्री अनन्तपद्मनाभाय नमः । आचमनीयं समर्पयामि ॥

चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

आचमनीयं समर्पयामि ॥

---

२९ स्नानं

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥

गंगाच यमुनाश्चैव नर्मदाश्च सरस्वति ।
तापि पयोष्णि रेवच ताभ्यः स्नानार्थमाहृतं ॥

ॐ श्री अनन्तपद्मनाभाय नमः । मलापकर्श स्नानं समर्पयामि ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ॥

२९.१ पंचामृत स्नानं
२९.१.१ पय स्नानं (milk bath)

ॐ आप्याय स्व स्वसमेतुते ।
विश्वतः सोमवृष्ण्यं भवावाजस्य सन्गधे ॥

सुरभेस्तु समुत्पन्नं देवानां अपि दुर्लभम् ।
पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्री अनन्तपद्मनाभाय नमः । पय स्नानम् समर्पयामि ॥
पयः स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.१.२ दधि स्नानं (curd bath)

ॐ दधिक्रावणो अकारिषं जिष्णोरश्वस्यवाजिनः ।
सुरभिनो मुखाकरत् प्रण आयुंषितारिषत् ॥

चन्द्र मन्डल संकाशं सर्व देव प्रियं हि यत् ।
दधि ददामि देवेश स्नानार्थम् प्रतिगृह्यताम् ॥

ॐ श्री अनन्तपद्मनाभाय नमः । दधि स्नानं समर्पयामि ॥
दधि स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.१.३ घृत स्नानं (ghee bath)

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंवस्यधाम
अनुष्ठधमावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यं ॥

आज्यं सुरानां आहारं आज्यं यज्ञेय प्रतिष्ठितम् ।
आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यता ॥

ॐ श्री अनन्तपद्मनाभाय नमः । घृत स्नानं समर्पयामि ॥
घृत स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.१.४ मधु स्नानं (honey bath)

ॐ मधुवात ऋतायथे मधुक्षरंति सिन्धवः माध्विनः
संतोष्वधीः
मधुनक्त मुथोशसो मधुमत्वार्थिवं रजः मधुद्यौ रस्तुनः पित
मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतुनः ॥

सर्वौषधि समुत्पन्नं पीयुष सदृशं मधु ।
स्नानर्तन्ते मया दत्तं गृहाण परमेश्वर ॥

ॐ श्री अनन्तपद्मनाभाय नमः । मधु स्नानं समर्पयामि ॥
मधु स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.१.५ शर्करा स्नानं (sugar bath)

ॐ स्वादुः पवस्य दिव्याय जन्मने स्वादुदरिन्द्राय सुहवीतु नाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमा अदाभ्यः ॥

इक्षु दन्डात् समुत्पन्ना रस्यस्निग्ध तरा शुभा ।
शर्करेयम् मया दत्ता स्नानार्थम् प्रतिगृह्यताम् ॥

ॐ श्री अनन्तपद्मनाभाय नमः । शर्करा स्नानं समर्पयामि ॥
शर्करा स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.२ गंधोदक स्नानं (Sandlewood water bath)

ॐ गंधद्वारां दुराधर्शां नित्य पुष्पां करीषिणीं ।
ईश्वरीं सर्व भूतानां त्वामि होपह्वये श्रियं ॥

हरि चंदन संभूतं हरि प्रीतेश्च गौरवात् ।
सुरभि प्रिय गोविन्द गंध स्नानाय गृह्यतां ॥

ॐ श्री अनन्तपद्मनाभाय नमः । गंधोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.३ अभ्यंग स्नानं (Perfumed Oil bath)

ॐ कनिक्रदज्वनुशं प्रभ्रुवान इयथिर्वाचमरितेव नावं ।
सुमंगलश्च शकुने भवासि मात्वा काचिदभिभाविष्ठ्या विदत ॥

अभ्यंगार्थं महीपाल तैलं पुष्पादि संभवं ।
सुगंध द्रव्य संमिश्रं संगृहाण जगत्पते ॥

ॐ श्री अनन्तपद्मनाभाय नमः । अभ्यंग स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.४ अंगोद्वर्तनकं (To clean the body)

अंगोद्वर्तनकं देव कस्तूर्यादि विमिश्रितं ।
लेपनार्थं गृहाणेदं हरिद्रा कुंकुमैर्युतं ॥

ॐ श्री अनन्तपद्मनाभाय नमः । अंगोद्वर्तनकं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.५ उष्णोदक स्नानं (Hot water bath)

नाना तीर्था दाहृतं च तोयमुष्णं मयाकृतं ।
स्नानार्थं च प्रयश्चामि स्वीकुरुश्व दयानिधे ॥

ॐ श्री अनन्तपद्मनाभाय नमः । उष्णोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.६ शुद्धोदक स्नानं (Pure water bath)
sprinkle water all around

ॐ आपोहिष्टा मयो भुवः । तान ऊर्जे दधातन ।
महेरणाय चक्षसे । योवः शिवतमोरसः तस्यभाजयते हनः ।
उशतीरिव मातरः । तस्मा अरंगमामवो । यस्य क्षयाय जिंवध ।
आपो जन यथाचनः ॥

ॐ श्री अनन्तपद्मनाभाय नमः । शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥
(after sprinkling water around throw one tulasi leaf to the north)

---

३० महा अभिषेकः
(Sound the bell pour water from kalasha)
३०.१ पुरुष सूक्त

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अतिष्ठद् दशान्गुलम् ॥०१॥

पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥०२॥

एतावानस्य महिमा अतोज्यायांश् च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥०३॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः ।
ततो विष्वन् व्यक्रामत् साशनानशने अभि ॥०४॥

तस्माद् विराडजायत विराजो अधि पूरुषः ।
सजातो अत्यरिच्यत पश्चाद् भूमि अथोपुरः ॥०५॥

यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीद् आज्यं ग्रीष्म इध्मः शरद्धविः ॥०६॥

सप्तास्यासन्परिधयः त्रिः सप्त समिधः कृताः ।
